# Shri Sharada Bhujangaprayatastutih

# શ્રીશારદાભુજઙ્ગપ્રયાતસ્તુતિઃ

## Document Information

Text title : shAradAbhujangaprayAtastutiH

File name : shAradAbhujangaprayAtastutiH.itx

Category : devii, sachchidAnanda-shivAbhinava-nRisiMhabhAratI, devI, sarasvatI, bhujanga

Location : doc_devii

Author : Sachchidananda Shivabhinava Nrisimha Bharati Swamigal

Proofread by : PSA Easwaran psawaswaran at gmail.com

Latest update : November 9, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીશારદાભુજઙ્ગપ્રયાતસ્તુતિઃ

(કાલટીક્ષેત્રે)

સ્મિતોદ્ધૂતરાકાનિશાનાયકાયૈ
    કપોલપ્રભાનિર્જિતાદર્શકાયૈ ।
સ્વનેત્રાવધૂતાઙ્ગજાતધ્વજાયૈ
    સરોજોત્થસત્યૈ નમઃ શારદાયૈ ॥ ૧॥

ભવામ્ભોધિપારં નયન્ત્યૈ સ્વભક્તા-
    ન્વિનાયાસલેશં કૃપાનૌકયૈવ ।
ભવામ્ભોજનેત્રાદિસંસેવિતાયૈ
    અજસ્રં હિ કુર્મો નમઃ શારદાયૈ ॥ ૨॥

સુધાકુમ્ભમુદ્રાવિરાજત્કરાયૈ
    વ્યથાશૂન્યચિત્તૈઃ સદા સેવિતાયૈ ।
ક્ષુધાકામલોભાદિનિર્વાપણાયૈ
    વિધાતૃપ્રિયાયૈ નમઃ શારદાયૈ ॥ ૩॥

નતેષ્ટપ્રદાનાય ભૂમિં ગતાયૈ
    ગતેનાચ્છબર્હાભિમાનં હરન્ત્યૈ ।
સ્મિતેનેન્દુદર્પં ચ તોષં વ્રજન્ત્યૈ
    સુતેનેવ નમ્રૈર્નમઃ શારદાયૈ ॥ ૪॥

નતાલીયદારિદ્ર્યદુઃખાપહન્ત્ર્યૈ
    તથા ભીતિભૂતાદિબાધાહરાયૈ ।
ફણીન્દ્રાભવેણ્યૈ ગિરીન્દ્રસ્તનાયૈ
    વિધાતૃપ્રિયાયૈ નમઃ શારદાયૈ ॥ ૫॥

સુધાકુમ્ભમુદ્રાક્ષમાલાવિરાજ-
    ત્કરાયૈ કરામ્ભોજસમ્મર્દિતાયૈ
સુરાણાં વરાણાં સદા માનિનીનાં

મુદા સર્વદા તે નમઃ શારદાયૈ ॥ ૬॥

સમસ્તૈશ્ચ વેદૈઃ સદા ગીતકીર્ત્યૈ
નિરાશાન્તરઙ્ગામ્બુજાતસ્થિતાયૈ ।
પુરારાતિપદ્માક્ષપદ્મોદ્ભવાદ્યૈ-
ર્મુદા પૂજિતાયૈ નમઃ શારદાયૈ ॥ ૭॥

અવિદ્યાઽઽપદુદ્ધારબદ્ધાદરાયૈ
તથા બુદ્ધિસમ્પત્પ્રદાનોત્સુકાયૈ ।
નતેભ્યઃ કદાચિત્સ્વપાદામ્બુજાતે
વિધેઃ પુણ્યવત્યૈ નમઃ શારદાયૈ ॥ ૮॥ var પુણ્યતત્યૈ

પદામ્ભોજનમ્રાન્કૃતે ભીતભીતાન્
દ્રુતં મૃત્યુભીતેર્વિમુક્તાન્વિધાતુમ્ ।
સુધાપૂર્ણકુમ્ભં કરે કિં વિધત્સે
દ્રુતં પાયયિત્વા યથાતૃપ્તિ વાણિ ॥ ૯॥

મહાન્તો હિ મહ્યં હૃદમ્ભોરુહાણિ
પ્રમોદાત્સમર્પ્યાસતે સૌખ્યભાજઃ ।
ઇતિ ખ્યાપનાયાનતાનાં કૃપાબ્ધે
સરોજાન્યસઙ્ખ્યાનિ ધત્સે કિમમ્બ ॥ ૧૦॥

શરચ્ચન્દ્રનીકાશવસ્ત્રેણ વીતા
કનદ્ભર્મયષ્ટેરહઙ્કારભેત્ત્રી ।
કિરીટં સતાટઙ્કમત્યન્તરમ્યં
વહન્તી હૃદબ્જે સ્ફુરત્વમ્બ મૂર્તિઃ ॥ ૧૧॥

નિગૃહ્યાક્ષવર્ગં તપો વાણિ કર્તું
ન શક્નોમિ યસ્માદવશ્યાક્ષવર્ગઃ ।
તતો મય્યનાથે દયા પારશૂન્યા
વિધેયા વિધાતૃપ્રિયે શારદામ્બ ॥ ૧૨॥

કવિત્વં પવિત્વં દ્વિષચ્છૈલભેદે
રવિત્વં નતસ્વાન્તહૃદ્ધ્વાન્તભેદે ।
શિવત્વં ચ તત્ત્વપ્રબોધે મમામ્બ
ત્વદઙ્ઘ્ર્યબ્જસેવાપટુત્વં ચ દેહિ ॥ ૧૩॥

વિલોક્યાપિ લોકો ન તૃપ્તિં પ્રયાતિ
    પ્રસન્નં મુખેન્દું કલઙ્કાદિશૂન્યમ્ ।
યદીયં ધ્રુવં પ્રત્યહં તાં કૃપાબ્ધિં
    ભજે શારદામ્બામજસ્રં મદમ્બામ્ ॥ ૧૪॥

પુરા ચન્દ્રચૂડો ધૃતાચાર્યરૂપો
    ગિરૌ શ‍ૃઙ્ગપૂર્વે પ્રતિષ્ઠાપ્ય ચક્રે ।
સમારાધ્ય મોદં યયૌ યામપારં
    ભજે શારદામ્બામજસ્રં મદમ્બામ્ ॥ ૧૫॥

ભવામ્ભોધિપારં નયન્તીં સ્વભક્તાન્
    ભવામ્ભોજનેત્રાજસમ્પૂજ્યમાનામ્ ।
ભવદ્ભવ્યભૂતાઘવિધ્વંસદક્ષાં
    ભજે શારદામ્બામજસ્રં મદમ્બામ્ ॥ ૧૬॥

વરાક ત્વરા કા તવેષ્ટપ્રદાને
    કથં પુણ્યહીનાય તુભ્યં દદાનિ ।
ઇતિ ત્વં ગિરાં દેવિ મા બ્રૂહિ યસ્મા-
    દઘારણ્યદાવાનલેતિ પ્રસિદ્ધા ॥ ૧૭॥

ઇતિ શ‍ૃઙ્ગેરિ શ્રીજગદ્ગુરુ શ્રીસચ્ચિદાનન્દશિવાભિનવનૃસિંહ-
ભારતીસ્વામિભિઃ વિરચિતા શ્રીશારદાભુજઙ્ગપ્રયાતસ્તુતિઃ સમ્પૂર્ણા ।

Proofread by PSA Easwaran

*Shri Sharada Bhujangaprayatastutih*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*